श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

विल्लूर् नडादूर् श्री श्रीनिधिस्वामि कृतिषु

# ॥ गोदास्तवः ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ गोदास्तवः ॥

कवितोजितकल्लोलिकन्यकाकान्तवक्षसे।
करुणादिगुणाढ्याय कमलानिधये नमः॥

श्रीमद्वेङ्कटशेषार्यपदपङ्कजषट्पदः।
श्रीविष्णुचित्ततनयास्तुतिझङ्कारभूषितः॥ १ ॥

श्रीरङ्गनाथरतिनाथसमर्पकाणि
श्रीविष्णुचित्तहृदयामृतवर्षकाणि।
श्रीधन्विनव्यपुरभाग्यविबोधकानि
त्वद्वीक्षितानि शुभदानि भवन्ति गोदे!॥ २ ॥

सौम्याननाम्बुजषडङ्घ्रिमनोहराणि
सम्फुल्लनीलकमलोदरनिन्दकानि।
सम्पत्कराणि सकलार्थनिवेशनानि
त्वद्वीक्षितानि शुभदानि भवन्ति गोदे!॥ ३ ॥

गोदेति नाम तव ये तु जपन्ति वक्त्रे
भक्त्या मुहुः परमयाम्ब! परं विचित्रम्।
तत्पादपद्मयुगलस्थितधूलयोऽपि
गोदा भवन्ति परिचिन्तयतां नराणाम्॥ ४ ॥

रचितदुरितभेदे! रक्तकौसुम्भपादे!
रमणहृदयमोदे! रक्षिताशेषवेदे!।
परिहृतनतखेदे! भव्यकृत्सत्प्रसादे!
कलुषितकलिवादे! मङ्गलं देहि गोदे!॥ ५ ॥

मुग्धैः प्रौढैर्मञ्जुलैरङ्गसङ्गैः
स्निग्धापाङ्गैः कल्पितापाङ्गजालैः।

www.prapatti.com

श्रीरङ्गेन्दोरन्तरङ्गं विधत्ते
हस्ते कृत्वास्मासु सैषा दयार्द्रम्॥ ६॥

श्रीविष्णुचित्तपरिलालितबालभावं
श्रीरङ्गनाथरतिदायकमुग्धभावम्।
वाचा प्रकाशितपुराणवचोन्तरङ्गं
गोदाभिधं हरति दैवतमन्तरङ्गम्॥ ७॥

को वा कविर्भुवि विभाति सुधीर्मुखं मे
संवर्णयत्विह स इत्युपमाविहीनाम्।
पार्श्वे पुरश्च सविधे सविधेतरे च
सर्वत्र काञ्चन बिभर्षि मुखे तु शोभाम्॥ ८॥

त्वत्कण्ठमध्यसमुदञ्चितरम्यनाद-
प्रोन्नीतमञ्जुलशुकीवसतिश्शुकः किम्?।
तद्दर्शनप्रणयवानिव हस्तवासी
निर्बन्धनोऽपि डयते वियतीह नायम्॥ ९॥

श्रीरङ्गनाथाधरनर्तकस्य
रङ्गस्थलं मातरयं कपोलः।
कोऽलं विलास्यस्य कलाप्रवीणः
कलैकदेशेऽपि हि वर्णनाय॥ १०॥

मातर्गोदे! चरणयुगलं संश्रितत्राणदीक्षं
दासस्सोऽयं भजति नरकान् भावयन् भाविनस्तान्।
दृष्ट्वास्यैनः कुलमपि तथा क्वाप्यदृष्ट्वा च शान्तिं
केनाप्यस्मिन् प्रकटितदया हन्त जन्तौ भव त्वम्॥ ११॥

गोदाकपोलपरिचुम्बनतः कृतार्थं
तद्दन्तसन्दशनतः परमाभिरामम्।
बिम्बाधरं लसति रङ्गपते! त्वदीयं
चेतो विधाय विवशं मम दर्शनीयम्॥ १२॥



www.prapatti.com

श्रीविष्णुचित्ततनयाकरवारिजात-
संस्पर्शसम्पुलकितस्तव यः कपोलः।
बिम्बाधरप्रबलचेष्टितपाटवस्य
तस्यास्पदं मम विभातु सदान्तरङ्गे॥ १३॥

कान् वा करोति रमणी रमणीयभावान्
अङ्गैरतीव मधुरैरिति साभिलाषम्।
श्रीविष्णुचित्ततनुजातनुदत्तदृष्टेः
दृष्टीर्विभावयति सादरमेष दासः॥ १४॥

भाग्यं पुराणमधुना परिपक्वमेतत्
निर्द्वन्द्वगन्धनिलया मम पद्मिनीयम्।
पार्श्वे सदास्ति रमणी रमणीयरूपा
गोदेति दृप्तमहमत्र भजामि घोणम्॥ १५॥

शतमखमणिनीला शार्ङ्गिणस्तुल्यरूपा
शयकृतशुकपोता शर्वरीकान्तवक्त्रा।
शमितसकलतापा शातिताभव्यजाता
शरणमुपगतानां शं सदा सौतु गोदा॥ १६॥

न भक्तिर्न ज्ञानं न घुणलिपिनीत्याप्यनुसृतिः
सरण्यास्साधूनामिह विकसिताम्भोजनयन!।
हरे! गोदानाथेत्यभिनयनमेवास्ति परमं
निदानं तत्कृत्वा मयि कलय रङ्गेन्द्र! करुणाम्॥ १७॥

श्रीमद्वेङ्कटशेषवर्यगुरुराड्वादाम्बुपानागत-
ब्राह्मीनर्तनरङ्गभूतरसनाजाग्रत्तुरङ्गाननः।
कश्चित् श्रीनिधिराघवाभिधकविः काव्यार्थवित्सम्मतः
श्रीगोदास्तवमाततान कुतुकी तत्पादविन्यस्तधीः॥ १८॥

॥ इति गोदास्तवः समाप्तः॥